# Shri Krishnastutihguhyaka

# શ્રીકૃષ્ણસ્તુતિઃગુહ્યક

## Document Information

Text title : kRRiShNastutiH guhyaka

File name : kRRiShNastutiHguhyaka.itx

Category : vishhnu, krishna, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તુતિઃગુહ્યક

ગુહ્યકકૃતા

કૃષ્ણ કૃષ્ણ મહાયોગિંસ્ત્વમાદ્યઃ પુરુષઃ પરઃ ।
વ્યક્તાવ્યક્તમિદં વિશ્વં રૂપં તે બ્રાહ્મણા વિદુઃ ॥ ૧॥

ત્વમેકઃ સર્વભૂતાનાં દેહાસ્વાત્મેન્દ્રિયેશ્વરઃ ।
ત્વમેવ કાલો ભગવાન્ વિષ્ણુરવ્યય ઈશ્વરઃ ॥ ૨॥

ત્વં મહાન્ પ્રકૃતિઃ સૂક્ષ્મા રજઃસત્ત્વતમોમયી ।
ત્વમેવ પુરુષોઽધ્યક્ષઃ સર્વક્ષેત્રવિકારવિત્ ॥ ૩॥

ગૃહ્યમાણૈસ્ત્વમગ્રાહ્યો વિકારૈઃ પ્રાકૃતૈર્ગુણૈઃ ।
કો ન્વિહાર્હતિ વિજ્ઞાતું પ્રાક્સિદ્ધં ગુણસંવૃતઃ ॥ ૪॥

તસ્મૈ તુભ્યં ભગવતે વાસુદેવાય વેધસે ।
આત્મદ્યોતગુણૈશ્છન્નમહિમ્ને બ્રહ્મણે નમઃ ॥ ૫॥

યસ્યાવતારા જ્ઞાયન્તે શરીરેષ્વશરીરિણઃ ।
તૈસ્તૈરતુલ્યાતિશયૈર્વીર્યૈર્દેહિષ્વસઙ્ગતૈઃ ॥ ૬॥

સ ભવાન્ સર્વલોકસ્ય ભવાય વિભવાય ચ ।
અવતીર્ણોઽમ્શભાગેન સામ્પ્રતં પતિરાશિષામ્ ॥ ૭॥

નમઃ પરમકલ્યાણ નમઃ પરમમઙ્ગલ ।
વાસુદેવાય શાન્તાય યદૂનાં પતયે નમઃ ॥ ૮॥

અનુજાનીહિ નૌ ભૂમંસ્તવાનુચરકિઙ્કરૌ ।
દર્શનં નૌ ભગવત ઋષેરાસીદનુગ્રહાત્ ॥ ૯॥

વાણી ગુણાનુકથને શ્રવણૌ કથાયાં
હસ્તૌ ચ કર્મસુ મનસ્તવ પાદયોર્નઃ ।
સ્મૃત્યાં શિરસ્તવ નિવાસજગત્પ્રણામે

દૃષ્ટિઃ સતાં દર્શનેઽસ્તુ ભવત્તનૂનામ્ ॥ ૧૦॥

ઇતિ શ્રીમદ્ભાગવતાન્તર્ગતં ગુહ્યકકૃતા શ્રીકૃષ્ણસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Krishnastutihguhyaka*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*